শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে দ্বিনৱতিতমং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে দ্ৱিনৱতিতমং দশকম্॥

## কর্মমিশ্রভক্তিস্ৱরূপৱর্ণনম্

ৱেদৈস্সর্ৱাণি কর্মাণ্যফলপরতযা
    ৱর্ণিতানীতি বুধ্ৱা
তানি ৎৱয্যর্পিতান্যেৱ হি সমনুচরন্
    যানি নৈষ্কর্ম্যমীশ।
মা ভূদ্ৱেদৈর্নিষিদ্ধে কুহচিদপি মনঃ
    কর্মৱাচাং প্রৱৃত্তি -
র্দুর্ৱর্জং চেদৱাপ্তং তদপি খলু ভৱ -
    ত্যর্পযে চিৎপ্রকাশে॥ **92.1** ॥

যস্ত্ৱন্যঃ কর্মযোগস্তৱ ভজনময -
    স্তত্র চাভীষ্টমূর্তিং
হৃদ্যাং সত্ত্ৱৈকরূপাং দৃষদি হৃদি মৃদি
    ক্ৱাপি ৱা ভাৱযিৎৱা।
পুষ্পৈর্গন্ধৈর্নিৱেদ্যৈরপি চ ৱিরচিতৈঃ
    শক্তিতো ভক্তিপূতৈ -
র্নিত্যং ৱর্যাং সপর্যাং ৱিদধদযি ৱিভো
    ৎৱৎপ্রসাদং ভজেযম্॥ **92.2** ॥

স্ত্রীশূদ্রাস্ত্ৱৎকথাদিশ্রৱণৱিরহিতা
    আসতাং তে দযার্হা -
স্ত্ৱৎপাদাসন্নযাতান্ দ্ৱিজকুলজনুষো
    হন্ত শোচাম্যশান্তান্।

ৱৃত্ত্যর্থং তে যজন্তো বহুকথিতমপি
ৎৱামনাকর্ণযন্তো
দৃপ্তা ৱিদ্যাভিজাত্যৈঃ কিমু ন ৱিদধতে
তাদৃশং মা কৃথা মাম্॥ **92.3**॥

পাপোঽযং কৃষ্ণরামেত্যভিলপতি নিজং
গূহিতুং দুশ্চরিত্রং
নির্লজ্জস্যাস্য ৱাচা বহুতরকথনী -
যানি মে ৱিঘ্নিতানি।
ভ্রাতা মে ৱন্ধ্যশীলো ভজতি কিল সদা
ৱিষ্ণুমিত্থং বুধাংস্তে
নিন্দন্ত্যুচ্চৈর্হসন্তি ৎৱযি নিহিতমতীং -
স্তাদৃশং মা কৃথা মাম্॥ **92.4**॥

শ্ৱেতচ্ছাযং কৃতে ৎৱাং মুনিৱরৱপুষং
প্রীণযন্তে তপোভি -
স্ত্রেতাযাং স্রুকস্রুৱাদ্যঙ্কিতমরুণতনুং
যজ্ঞরূপং যজন্তে।
সেৱন্তে তন্ত্রমার্গৈর্ৱিলসদরিগদং
দ্বাপরে শ্যামলাঙ্গং
নীলং সঙ্কীর্তনাদ্যৈরিহ কলিসমযে
মানুষাস্ত্বাং ভজন্তে॥ **92.5**॥

সোঽযং কালেযকালো জযতি মুররিপো
যত্র সঙ্কীর্তনাদ্যৈ -
র্নির্যত্নৈরেৱ মার্গৈরখিলদ ন চিরা -
ত্ত্বৎপ্রসাদং ভজন্তে।
জাতাস্ত্রেতাকৃতাদাৱপি হি কিল কলৌ

সম্ভৱং কামযন্তে
দৈৱাত্তত্রৈৱ জাতান্ ৱিষযৱিষরসৈ -
র্মা ৱিভো ৱঞ্চযাস্মান্॥ **92.6**॥

ভক্তাস্তাৱৎ কলৌ স্যুর্দ্রমিলভুৱি ততো
ভূরিশস্তত্র চোচ্চৈঃ
কাৱেরীং তাম্রপর্ণীমনু কিল কৃতমা -
লাং চ পুণ্যাং প্রতীচীম্।
হা মামপ্যেতদন্তর্ভৱমপি চ ৱিভো
কিঞ্চিদঞ্চদ্রসং ৎৱ -
য্যাশাপাশৈর্নিবধ্য ভ্রময ন ভগৱন্
পূরয ৎৱন্নিষেৱাম্॥ **92.7**॥

দৃষ্টৱা ধর্মদ্রুহং তং কলিমপকরুণং
প্রাঙ্মহীক্ষিৎ পরীক্ষি -
দ্ধন্তুং ৱ্যাকৃষ্টখড্গোঽপি ন ৱিনিহতৱান্
সারৱেদী গুণাংশাৎ।
ৎৱৎসেৱাদ্যাশু সিধ্যেদসদিহ ন তথা
ৎৱৎপরে চৈষ ভীরু -
র্যত্তু প্রাগেৱ রোগাদিভিরপহরতে
তত্র হা শিক্ষযৈনম্॥ **92.8**॥

গঙ্গা গীতা চ গাযত্র্যপি চ তুলসিকা
গোপিকাচন্দনং তৎ
সালগ্রামাভিপূজা পরপুরুষ তথৈ -
কাদশী নামৱর্ণাঃ।
এতান্যষ্টাপ্যযত্নান্যযি কলিসমযে
ৎৱৎপ্রসাদপ্রৱৃদ্ধ্যা

ক্ষিপ্রং মুক্তিপ্রদানীত্যভিদধুরৃষয -
    স্তেষু মাং সজ্জযেথাঃ ॥ **92.9** ॥

দেৱর্ষীণাং পিতৄণামপি ন পুনরৃণী
    কিঙ্করো ৱা স ভূমন্
যোঽসৌ সর্ৱাত্মনা ৎৱাং শরণমুপগত -
    স্সর্ৱকৃত্যানি হিৎৱা।
তস্যোৎপন্নং ৱিকর্মাপ্যখিলমপনুদ -
    স্যেৱ চিত্তস্থিতস্ত্বং
তন্মে পাপোত্থতাপান্ পৱনপুরপতে
    রুন্ধি ভক্তিং প্রণীযাঃ ॥ **92.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে দ্বিনৱতিতমং দশকং সমাপ্তম্ ॥